# Apastambakritam Shiva Stotram

# આપસ્તમ્બકૃતં શિવસ્તોત્રમ્

## Document Information

Text title : Apastambakritam Shiva Stotram

File name : ApastambakRRitaMshivastotram.itx

Category : shiva, brahmapurANa, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : brahmapurANa | adhyAya 130/23-31||

Latest update : October 1, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

October 1, 2024

*sanskritdocuments.org*

# આપસ્તમ્બકૃતં શિવસ્તોત્રમ્

આપસ્તમ્બ ઉવાચ ।
કાષ્ઠેષુ વહ્નિઃ કુસુમેષુ ગન્ધો બીજેષુ વૃક્ષાદિ દૃષત્સુ હેમ ।
ભૂતેષુ સર્વેષુ તથાઽસ્તિ યો વૈ તં સોમનાથં શરણં વ્રજામિ ॥ ૨૩॥

યો લીલયા વિશ્વમિદં ચકાર ધાતા વિધાતા ભુવનત્રયસ્ય ।
યો વિશ્વરૂપઃ સદસત્પરો યઃ સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૨૪॥

યં સ્મૃત્ય દારિદ્યમહાભિશાપરોગાદિભિર્ન સ્પૃશ્યતે શરીરી ।
યમાશ્રિતાશ્ચેપ્સિતમાપ્નુવન્તિ સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૨૫॥

યેન ત્રયીધર્મમવેક્ષ્ય પૂર્વં બ્રહ્માદયસ્તત્ર સમીહિતાશ્ચ ।
એવં દ્વિધા યેન કૃતં શરીરં સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૨૬॥

યસ્મૈ નમો ગચ્છતિ મન્ત્રપૂતં હુતં હવિર્યા ચ કૃતા ચ પૂજા ।
દત્તં હવિર્યેન સૂરા ભજન્તે સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૨૭॥

યસ્માત્પરં નાન્યદસ્તિ પ્રશસ્તં યસ્માત્પરં નૈવ સુસૂક્ષ્મમન્યત્ ।
યસ્માત્પરં નો મહતાં મહચ્ચ સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૨૮॥

યસ્યાજ્ઞયા વિશ્વમીદં વિચિત્રમચિન્ત્યરૂપં વિવિધં મહચ્ચ ।
એકક્રિયં યદ્વદનુપ્રયાતિ સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૨૯॥

યસ્મિન્વિભૂતિઃ સકલાધિપત્યં કર્તૃત્વદાતૃત્વમહાત્ત્વમેવ ।
પ્રીતિર્યશઃ સૌખ્યમનાદિધર્મઃ સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૩૦॥

નિત્યં શરણ્યઃ સકલસ્ય પૂજ્યો નિત્યં પ્રિયો યઃ શરણાગતસ્ય ।
નિત્યં શિવો યઃ સકલસ્ય રૂપં સોમેશ્વરં તં શરણં વ્રજામિ ॥ ૩૧॥

ઇતિ બ્રહ્મપુરાણે ત્રંશાધિકશતતમાધ્યાયાન્તર્ગતં
આપસ્તમ્બકૃતં શિવસ્તોત્રં સમાપ્તમ્ ।

બ્રહ્મપુરાણ । અધ્યાય ૧૩૦/૨૩-૩૧॥

brahmapurANa . adhyAya 130/23-31..

Proofread by PSA Easwaran

*Apastambakritam Shiva Stotram*

pdf was typeset on October 1, 2024

Please send corrections to *sanskrit@cheerful.com*